प्रथमा दीक्षा : सम्भाषणम्

## अनुमतिः

सप्तमी/तसिल्

प्रकाशः - अम्ब । मम विद्यालये प्रवासः अस्ति । 150 रूप्यकाणि एकस्य । अहम् अपि गच्छामि वा ?

माता - अहं कथं वदामि ? पिता खलु धनं ददाति ?

प्रकाशः - भवती एव वदतु तातम् ।

माता - कुत्र प्रवासः ?

प्रकाशः - प्रथमं विद्यालयतः पक्षिधाम गत्वा वस्तुप्रदर्शनालयं गच्छन्ति । तत्रैव उपाहारं खादित्वा उद्यानं गच्छन्ति । उद्याने क्रीडित्वा मन्दिरं गच्छन्ति । मन्दिरं श्लोकम् उक्त्वा भोजनालयं गच्छन्ति ।

माता - कति छात्राः गच्छन्ति भोः ?

प्रकाशः - मम कक्ष्यायां सर्वेऽपि गच्छन्ति । ते सर्वे धनमपि दत्तवन्तः । इतः परम् अहम् एकाकी तातं पृष्ट्वा धनं ददामि ।

माता - श्वः एव तातं पृष्ट्वा, धनं नयतु ।

प्रकाशः - अम्बायाः अनुमतिः प्राप्ता । अर्धं कार्यं समाप्तम् ।

पिता - वत्स । कस्मिन् विषये अनुमतिः ?

प्रकाशः - तात । मम विद्यालये प्रवासार्थं पक्षिधाम गच्छन्ति । अतः 150 रुप्यकाणि पश्यतु ।

पिता - सर्वे गच्छन्ति खलु । सर्वैः सह मिलित्वा गच्छतु । वस्तुप्रदर्शनालयं सम्यक् पश्यतु ।

प्रकाशः - धन्यवादः तात । श्वः धनं नेष्यामि ।